# प्रकृतिविकृतिपाठविमर्शः

## सुस्वागतम्



प्रस्तोता – सत्यव्रतपाण्डेयः (वेदविभागः)
प्राध्यापक-
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः





# प्रकृतिपाठाः

1. संहितापाठः -(परः संनिकर्षः संहिता)
2. पदपाठः - (पदविच्छेदोऽसंहिता)
3. क्रमपाठः – (क्रमेण पदद्वयस्य पाठः, योगरूढा संहिता, क्रमः स्मृतिप्रयोजनः)

# १. संहितापाठः

- अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् ।
  होता॑रं रत्न॒धात॑मम् ॥

# २. पदपाठः

- अ॒ग्निम् । ई॒ळे॒ । पु॒रःऽहि॑तम् । य॒ज्ञस्य॑ । दे॒वम् । ऋ॒त्विज॑म् । होता॑रम् । र॒त्न॒ऽधात॑मम् ॥

# ३. क्रमपाठः

अ॒ग्निम् ई॒ळे॒| ई॒ळे॒ पु॒रःऽहि॑तम् | पु॒रःऽहि॑तम् य॒ज्ञस्य॑ |
य॒ज्ञस्य॑ दे॒वम्| दे॒वम् ऋ॒त्विज॑म्| ऋ॒त्विज॑म् होता॑रम्|
होता॑रम् र॒त्न॒ऽधात॑मम्||

# पञ्चसन्धिलक्षणम्

अनुक्रमश्चोत्क्रमश्च व्युत्क्रमोऽभिक्रमस्तथा ।
संक्रमश्चेति पञ्चैते जटायां कथिताः क्रमाः ।।

( क्रमः > १-२;२-३;३-४) > अ॒ग्निम् । ई॒ळे॒ ।
(उत्क्रमः> २-२;३-३;४-४)>ई॒ळे॒ । ई॒ळे॒ ।
(व्युत्क्रमः> २-१;३-२;४-३> ई॒ळे॒ । अ॒ग्निम् ।
(अभिक्रमः>१-१;२-२;३-३)> अ॒ग्निम् । अ॒ग्निम् ।
(संक्रमः> १-२;२-३;३-४)> अ॒ग्निम् । ई॒ळे॒ ।

# विकृतिपाठाः

1. जटापाठः
2. मालापाठः
3. शिखापाठः
4. रेखापाठः
5. ध्वजपाठः
6. दण्डपाठः
7. रथपाठः
8. घनपाठः

शैशिरीये समाम्नाये व्यालिनैव महर्षिणा ।
जटाद्या विकृतीरष्टौ लक्ष्यन्ते नातिविस्तरम् ॥ १ ॥
जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥ २ ॥

# जटालक्षणम्

## प्रथमं जटालक्षणम्

अनुलोमविलोमाभ्यां त्रिवारं हि पठेत् क्रमम् ।
विलोमे पदवत्संधिः अनुलोमे यथाक्रमम् ॥

## द्वितीयं जटालक्षणम्

क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ।
अभ्यस्य पूर्व च तथोत्तरे पदे ऽवसानमेवं हि जटाभिधीयते ।।

अष्टौ विकृतयः क्रमपूर्वा भवन्ति । तासु जटा-दण्डसंज्ञके द्वे विकृती मुख्ये । यत पताभ्यामेवान्या विकृतयः संभवन्ति । तत्र जटां शिखाऽनुसरति । तथा च दण्डं माला-रेखा-ध्वज-रथा अनुसरन्ति । घनस्तु जटादण्डावनुसरति ।

१,२,२,१,१,२

# १. जटापाठः

अ॒ग्निम् ई॒ळे| ई॒ळे अ॒ग्निम्| अ॒ग्निम् ई॒ळे||
ई॒ळे पु॒रःऽहि॑तम्| पु॒रःऽहि॑तम् ई॒ळे| ई॒ळे पु॒रःऽहि॑तम्||
पु॒रःऽहि॑तम् य॒ज्ञस्य॑| य॒ज्ञस्य॑ पु॒रःऽहि॑तम्| पु॒रःऽहि॑तम् य॒ज्ञस्य॑||
य॒ज्ञस्य॑ दे॒वम्| दे॒वम् य॒ज्ञस्य॑| य॒ज्ञस्य॑ दे॒वम्||
दे॒वम् ऋ॒त्विज॑म्| ऋ॒त्विज॑म् दे॒वम्| दे॒वम् ऋ॒त्विज॑म्||
होता॑रम् र॒त्न॒ऽधात॑मम्| र॒त्न॒ऽधात॑मम् होता॑रम्| होता॑रम् र॒त्न॒ऽधात॑मम्||

# मालालक्षणम्

(१. क्रममाला)

ब्रूयात्क्रमविपर्यासावर्धर्चस्यादितोऽन्ततः ।
अन्तं चादिं नयेदेवं क्रममालेति गीयते ।।

(२. पुष्पमाला)

माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा ।
आवर्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसंक्रमाः ॥

जटावदेव पुष्पमाला भवति । तत्र प्रतिपदं विराम इतिकारश्चेति विशेषः ।
केचिच्च पुष्पमालायामितिकारं पदसन्धिस्थानेऽपि वदन्ति ।

# २. मालापाठः

## १.(क्रममाला)

| | |
|---|---|
| अ॒ग्निम् ई॒ळे। | ऋ॒त्विज॑म् दे॒वम्। |
| ई॒ळे पु॒रःऽहि॑तम्। | दे॒वम् य॒ज्ञस्य॑। |
| पु॒रःऽहि॑तम् य॒ज्ञस्य॑। | य॒ज्ञस्य॑ पु॒रःऽहि॑तम्। |
| य॒ज्ञस्य॑ दे॒वम्। | पु॒रःऽहि॑तम् ई॒ळे। |
| दे॒वम् ऋ॒त्विज॑म्। | ई॒ळे अ॒ग्निम्। |

## २.(पुष्पमाला) १,२ । २,१ । १,२

अ॒ग्निम् ई॒ळे। ई॒ळे अ॒ग्निम्। अ॒ग्निम् ई॒ळे॥

ई॒ळे पु॒रःऽहि॑तम्। पु॒रःऽहि॑तम् ई॒ळे। ई॒ळे पु॒रःऽहि॑तम्॥

पु॒रःऽहि॑तम् य॒ज्ञस्य॑। य॒ज्ञस्य॑ पु॒रःऽहि॑तम्। पु॒रःऽहि॑तम् य॒ज्ञस्य॑॥

य॒ज्ञस्य॑ दे॒वम्। दे॒वम् य॒ज्ञस्य॑। य॒ज्ञस्य॑ दे॒वम्॥

दे॒वम् ऋ॒त्विज॑म्। ऋ॒त्विज॑म् दे॒वम्। दे॒वम् ऋ॒त्विज॑म्॥

# ३.शिखापाठः १,२,२,१,१,२,३

## (शिखालक्षणम्)

पदोत्तरां जटामेव शिखामार्याः प्रचक्षते ।

अ॒ग्निम् ई॒ळे॒| ई॒ळे॒ अ॒ग्निम्| अ॒ग्निम् ई॒ळे॒| पु॒रःऽहि॑तम्||
ई॒ळे॒ पु॒रःऽहि॑तम्| पु॒रःऽहि॑तम् ई॒ळे॒| ई॒ळे॒ पु॒रःऽहि॑तम्| य॒ज्ञस्य॑||
पु॒रःऽहि॑तम् य॒ज्ञस्य॑| य॒ज्ञस्य॑ पु॒रःऽहि॑तम्| पु॒रःऽहि॑तम् य॒ज्ञस्य॑| दे॒वम्||
य॒ज्ञस्य॑ दे॒वम्| दे॒वम् य॒ज्ञस्य॑| य॒ज्ञस्य॑ दे॒वम्| ऋ॒त्विज॑म्||
दे॒वम् ऋ॒त्विज॑म्| ऋ॒त्विज॑म् दे॒वम्| दे॒वम् ऋ॒त्विज॑म्||
होता॑रम् र॒त्न॒ऽधात॑मम्| र॒त्न॒ऽधात॑मम् होता॑रम्| होता॑रम् र॒त्न॒ऽधात॑मम्||

# (रेखालक्षणम्)

क्रमाद् द्वित्रिचतुष्पञ्चपदक्रममुदाहरेत् ।
पृथक्पृथग्विपर्यस्य लेखामाहुः पुनः क्रमात् ।।

# ४.रेखापाठः

पदद्वयं= अ॒ग्निम् ई॒ळे॒| ई॒ळे॒ अ॒ग्निम्| अ॒ग्निम् ई॒ळे॒||
पदत्रयं= ई॒ळे॒ पु॒रःऽहि॑तम् य॒ज्ञस्य॑| य॒ज्ञस्य॑ पु॒रःऽहि॑तम् ई॒ळे॒ | ई॒ळे॒ पु॒रःऽहि॑तम्||
पदचतुष्कं= पु॒रःऽहि॑तम् य॒ज्ञस्य॑ दे॒वम् ऋ॒त्विज॑म्| ऋ॒त्विज॑म् दे॒वम् य॒ज्ञस्य॑ पु॒रःऽहि॑तम्|..........||

# ७ ध्वज पाठ

- यह क्रम पाठ की तरह ही होता है।
- पदक्रम- १ २ २ ३ ३ ४
- ३ ४ २ ३ १ २।
- ४ ५ ५ ६ ६ ७
- ६ ७ ५ ६ ४ ५।

# ८ दण्डपाठ

- पदक्रम- १ २| २ १| १ २| २ ३ | ३ २ १||
- २ ३| ३ २| २ ३| ३ ४ | ४ ३ २||

# १ रथ पाठ

पदक्रम- १ २ ४ ५।

- १ २ ५ ४।
- १ २ २ ३।
- ४ ५ ५ ४।
- ३ ४ ६ ७।
- ३ ४ ७ ६।
- ३ ४ ४ ५। इत्यादि

# १० घनपाठ

- पदक्रम- १ २| २ १| १ २ ३| ३ २ १|
- १ २ ३| २ ३| ३ २| २ ३ ४| ४ ३ २|
- २ ३ ४| ३ ४| ४ ३| ३ ४ ५| ५ ४ ३| इत्यादि

# धन्यवादः